८

साधारणस्वरः- १

प्रस्तावना -

पाणिनीयव्याकरणे तु अन्येभ्यः प्रसिद्धव्याकरणेभ्यः स्वरविषयिणी चर्चा अधिकतया परिलक्ष्यते। स्वरविधायकानि बहूनि सूत्राणि अष्टाध्याय्यां विराजन्ते। तत्र विद्यमानैः कैश्चित् सूत्रैः धातुस्वरः विधीयते, कैश्चित् तु प्रत्ययस्वरः विधीयते, अन्यैः प्रातिपदिकस्वरः विधीयते। एतद्भिन्नानि साधारणस्वरविधायकानि अपि नैकानि सूत्राणि अष्टाध्याय्यां पदंकुर्वन्ति। तैः सूत्रैस्तु न कश्चित् विशिष्टः स्वरः विधीयते, अपि तु साधारणान् एव स्वरान् विदधति तानि सूत्राणि। तानि एव सूत्राणि अस्माभिः अस्मिन् पाठे संगृहीतानि। अत्र प्रधानतः कैश्चित् उदात्तादिस्वराः विधीयन्ते, कैश्चित् सूत्रैस्तु तेषां स्वराणां निषेधः अपि भवति। स्वरविषयकं सम्यक् ज्ञानं प्राप्तुम् अस्माभिः अवश्यम् एव इदं साधारणस्वरप्रकरणं पठनीयम्। अस्मिन् पाठे वयं तान् एव उदात्तानुदात्तस्वरिताख्यान् स्वरान् तद्विधायकानि सूत्राणि च पठामः। अस्मिन् पाठे दश सूत्राणि वयं पठामः।

उद्देश्यानि -

इमं पाठं पठित्वा भवान् -

- मन्त्राणां स्वरविधानविषये जानीयात्।
- स्वरविधायकानि सूत्राणि अवगच्छेत्।
- सूत्राणाम् अर्थान् उदाहरणानि च बोद्धुं शक्नुयात्।
- उदाहरणेषु सूत्रार्थानां समन्वयः कथं भवति इति ज्ञातुं प्रभवेत्।
- आमन्त्रितविषये जानीयात्।

८.१) अनुदात्तं पदमेकवर्जम्॥ (६.१.१५८)

सूत्रार्थः - यस्मिन् पदे यस्य उदात्तः स्वरितः वा विधीयते तम् एकम् अचं वर्जयित्वा शेषं तत्पदम् अनुदात्ताच्कं भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं परिभाषासूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि वर्तन्ते। अनुदात्तं पदम् एकवर्जम् इति सूत्रगतपदच्छेदः। अनुदात्तम् इति प्रथमान्तं तद्धितान्तं पदम्। पदम् इति

प्रथमान्तं पदम्। एकवर्जम् इत्यपि प्रथमान्तं पदम्। अनुदात्ताः अस्य सन्ति इत्यर्थे अनुदात्तशब्दात् 'अर्श-आदिभ्योऽच्' इति सूत्रेण मत्वर्थीय-अच्प्रत्यये अनुदात्तम् इति पदं निष्पद्यते। तस्य अर्थः भवति अनुदात्त-अच्विशिष्टं पदम् इति। एकवर्जम् इति पदस्य एकं वर्जयित्वा इत्यर्थः अस्ति। एकवर्जम्-इत्यस्मिन् पदे 'द्वितीयायां च' इति सूत्रेण णमुल्-प्रत्ययः वर्तते। परिभाषाः पदोपस्थापिकाः भवन्ति। अर्थात् परिभाषासूत्रेण अन्यस्मिन् सूत्रे किञ्चित् पदम् उपतिष्ठते, तथैव अस्य सूत्रस्य अपि परिभाषासूत्रत्वात् अनेन सूत्रेण 'एकं वर्जयित्वा अनुदात्तं पदम्' इति पदम् उपतिष्ठते।

तेन एकस्मिन् पदे वर्तमानाः अचः अनुदात्ताः भवन्ति, एकं वर्जयित्वा इत्येवम् अर्थः लभ्यते। तदा यम् एकं वर्जयित्वा अन्ये अनुदात्ताः भवन्ति इति उच्यते स एकः अच् कीदृशः भवेत् इति शङ्का उत्पद्यते। तत्र उच्यते यत् सः अच् उदात्तः स्वरितः वा भवति इति। तेन सूत्रस्य सामान्यः अर्थः भवति यत् एकस्मिन् पदे यावन्तः अचः सन्ति, तेषु एकम् उदात्तं स्वरितं वा अचं वर्जयित्वा अन्ये सर्वे अचः अनुदात्ताः भवन्ति इति।

उदाहरणम् - गोपाय नः स्वस्तये इति।

सूत्रार्थसमन्वयः - रक्षणक्रियावाचिनः भ्वादिगणे पठितस्य गुपूधातोः पकारोत्तरस्य ऊकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञायां 'तस्य लोपः' इत्यनेन लोपे च कृते गुप् इति स्थिते 'धातोः' इति सूत्रेण गुप्-धातोः अन्त्यस्य अचः गकारोत्तरस्य उकारस्य उदात्तस्वरः विधीयते। ततः गुप्-धातोः 'गुपूधूपविच्छिपणिपनिभ्य आयः' इति सूत्रेण आयप्रत्यये निष्पन्नस्य गोपाय इत्यस्य ओकारस्य उकारस्य एव विकृतत्वात् उदात्तत्वं भवति। गोपाय इत्यस्य आयप्रत्ययान्तत्वेन 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां 'धातोः' इति सूत्रेण गोपाय-धातोः अन्त्यस्य अचः यकारोत्तरस्य अकारस्य उदात्तस्वरः विधीयते। ततः गोपायधातोः लोटि मध्यमपुरुषैकवचने सिप्-प्रत्यये प्रक्रियाकार्ये गोपाय इति रूपं भवति। गोपाय इत्यत्र गकारोत्तरः ओकारः उदात्तः यकारोत्तरः अकारश्च उदात्तः अस्ति। तस्मात् प्रकृतसूत्रेण यकारोत्तरम् उदात्तम् अकारं वर्जयित्वा गकारोत्तरः ओकारः पकारोत्तरः आकारः च अनुदात्तः भवति। अत एव गोपाय नः स्वस्तये इति प्रयोगः सिद्ध्यति।

८.२) अनुदात्तस्य च यत्रोदात्तलोपः॥ (६.१.१६१)

सूत्रार्थः - यस्मिन् अनुदात्ते परे उदात्तः लुप्यते तस्य उदात्तः भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि विद्यन्ते। अनुदात्तस्य च यत्र उदात्तलोपः इति सूत्रगतपदच्छेदः। तत्र अनुदात्तस्य इति षष्ठ्यन्तं पदम्। च इति अव्ययपदम्। यत्र इत्यपि अव्ययपदम्। उदात्तलोपः इति प्रथमान्तं समस्तं पदम्। उदात्तस्य लोपः उदात्तलोपः इति षष्ठीतत्पुरुषसमासः। 'कर्षात्वतो घञोऽन्त उदात्तः' इति पूर्वसूत्रात् उदात्तः इति प्रथमान्तं पदम् अनुवर्तते। यत्र उदात्तलोपः (तत्र) अनुदात्तस्य उदात्तः इति पदयोजना भवति। अनुदात्तस्य इति पदस्य यत्र इति पदेन सह सम्बन्धः वर्तते। तेन यस्मिन्

अनुदात्ते इत्यर्थः लभ्यते। अत एव यस्मिन् अनुदात्ते परे सति उदात्तस्य लोपः जायते, तस्य अनुदात्तस्य उदात्तः भवति इति सूत्रार्थः लभ्यते।

उदाहरणम् - देवीं वाच॑म् इति।

सूत्रार्थसमन्वयः - पचादिगणे देवट्-इति शब्दस्य पाठात् दिव्-धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रेण अच्-प्रत्यये देवशब्दः निष्पद्यते। अच्-प्रत्ययस्य चकारस्य 'हलन्त्यम्' इति सूत्रेण इत्संज्ञा भवति, तस्मात् अच्-प्रत्ययः चित् वर्तते। तेन 'चितः' इति सूत्रेण अच्-प्रत्ययान्तस्य देवशब्दस्य अन्त्यस्य अचः अकारस्य उदात्तस्वरः विधीयते। एवम् अन्तोदात्तात् देवशब्दात् स्त्रीत्वविवक्षायां 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' इति सूत्रेण ङीप्प्रत्यये देव ङीप् इति स्थितिः भवति। तत्र ङीप्प्रत्ययस्य पकारस्य इत्त्वात् स प्रत्ययः पित् भवति। तेन 'अनुदात्तौ सुप्पितौ' इति सूत्रेण ङीप्प्रत्ययावयवस्य ईकारस्य अनुदात्तस्वरः विधीयते। ततः देव ई इति स्थिते 'यचि भम्' इति सूत्रेण देव इत्यस्य भसंज्ञायां 'यस्येति च' इति सूत्रेण ईकारपरकत्वात् पूर्वस्य भसंज्ञकस्य देव-इत्यस्य वकारोत्तरस्य अकारस्य लोपे देव् ई इति स्थितिः भवति। अत्र ईकाररूपे अनुदात्ते परे सति पूर्वस्य अकाररूपस्य उदात्तस्य लोपः जातः, तेन प्रकृतसूत्रेण तस्य अनुदात्तस्य ईकारस्य उदात्तस्वरः विधीयते। अतः देवीं वाच॑म् इति प्रयोगः सिध्यति।

८.३) चौ॥ (६.१.२२२)

सूत्रार्थः - लुप्ताकारे अञ्चतौ परे पूर्वस्य अन्तोदात्तः स्यात्।

सूत्रव्याख्या - पाणिनीयेषु षड्विधेषु सूत्रेषु विधिसूत्रम् इदम्। अनेन सूत्रेण उदात्तस्वरः विधीयते। अस्मिन् सूत्रे एकम् एव पदं वर्तते। तत् च चौ इति पदं सप्तम्येकवचनान्तं वर्तते। 'कर्षात्वतो घञोऽन्त उदात्तः' इति पूर्वसूत्रात् अन्तः उदात्तः इति च प्रथमान्तं पदद्वयम् अनुवर्तते। चौ अन्तः उदात्तः इति पदयोजना भवति। चौ इत्यत्र सप्तमी वर्तते, तस्मात् 'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषाबलात् पूर्वस्य इति पदम् उपतिष्ठते। चौ इत्यनेन लुप्त-अकारविशिष्टः अञ्चु-धातुः गृह्यते। तेन लुप्त-अकारविशिष्टे अञ्चु-धातौ परे सति पूर्वस्य यः अन्त्यः अच्, तस्य उदात्तस्वरः भवति इति सूत्रार्थः लभ्यते।

उदाहरणम् - देवद्रीचीं नयत देवयन्तः॑ इति।

सूत्रार्थसमन्वयः - देव-इत्युपपदपूर्वकात् अञ्चु-धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इत्यनेन सूत्रेण क्विन्प्रत्यये प्रक्रियाकार्ये देव अच् इति स्थिते 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इति सूत्रेण क्विन्प्रत्ययान्तस्य अञ्च्-धातोः परत्वेन सत्त्वात् देवशब्दस्य अकारस्य स्थाने अद्रि-इत्यादेशे देवद्रि अच् इति स्थिते 'उगितश्च' इति सूत्रेण स्त्रीत्वविवक्षायां देवद्रि अच् -इत्यस्मात् शब्दात् ङीप्रत्यये अनुबन्धलोपे देवद्रि अच् ई इति स्थिते 'अचः' इति सूत्रेण लुप्तनकारस्य अञ्च्धातोः अकारस्य लोपे देवद्रि च् ई इति स्थिते 'चौ' इति सूत्रेण लुप्ताकारस्य अञ्च्धातोः परत्वेन सत्त्वात् पूर्वस्य अणः इकारस्य दीर्घे देवद्रीची इति स्थिते लुप्ताकारस्य अञ्च्धातोः परत्वेन सत्वात् पूर्वस्य देवद्री-इत्यस्य अन्त्यस्य ईकारस्य प्रकृतसूत्रेण उदात्तस्वरः विधीयते। तेन देवद्रीचीं नयत देवयन्तः॑ इति प्रयोगः सिध्यति।

विशेषः - उदात्तनिवृत्तिस्वरापवादभूतम् इदं सूत्रम्। अर्थात् उदात्तस्य लोपं निमित्तीकृत्य 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रेण अनुदात्तस्य स्थाने यत् उदात्तस्वरविधानं भवति, तस्य अपवादभूतं भवति एतत् सूत्रम्। तेन देव-इत्युपपदपूर्वकात् अञ्चु-धातोः क्विन्प्रत्यये प्रक्रियाकार्ये देव अच् इति स्थिते 'गतिकारकोपपदात् कृत्' इत्यनेन उत्तरपदप्रकृतिस्वरेण अञ्चधातोः अकारः उदात्तः भवति। ततः देवशब्दस्य अकारस्य स्थाने अद्रि-इत्यादेशे देवद्रि अच् इति स्थिते, ततः ङीप्प्रत्यये ङीप्प्रत्ययस्य पित्त्वात् 'अनुदात्तौ सुप्पितौ' इत्यनेन ङीप्प्रत्ययस्य ईकारस्य अनुदात्तस्वरः भवति, तेन 'अचः' इत्यनेन अञ्चधातोः उदात्तस्य अकारस्य लोपे सति 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रेण अनुदात्तस्य ङीप्प्रत्ययस्य ईकारस्य उदात्तनिवृत्तिस्वरः प्राप्तः भवति, तदा तं प्रबाध्य प्रकृतसूत्रेण उदात्तस्वरः विधीयते।

पाठगतप्रश्नाः-१

१. अनुदात्तं पदमेकवर्जम् इति कीदृशं सूत्रम् ?

२. अनुदात्तं पदमेकवर्जम् इत्यस्मिन् सूत्रे अनुदात्तम् इति पदे कस्मिन् अर्थे कः प्रत्ययः वर्तते ?

३. अनुदात्तं पदमेकवर्जम् इति सूत्रेण कः स्वरः विधीयते ?

४. अनुदात्तस्य च यत्रोदात्तलोपः इति सूत्रस्य कः अर्थः ?

५. अनुदात्तस्य च यत्रोदात्तलोपः इत्यस्य उदाहरणम् एकं लिखत।

६. चौ इति सूत्रम् कस्य अपवादभूतम् ?

७. चौ इत्यस्मिन् सूत्रे चौ इति पदस्य कः अर्थः ?

८. चौ इति सूत्रस्य उदाहरणम् एकं लिखत।

८.४) आमन्त्रितस्य च॥ (६.१.१९८)

सूत्रार्थः - आमन्त्रितस्य आदिः उदात्तः भवति।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। अनेन सूत्रेण उदात्तस्वरः विधीयते। सूत्रेऽस्मिन् द्वे पदे स्तः। तत्र आमन्त्रितस्य इति षष्ठ्येकवचनान्तं पदम्। च इत्यव्ययपदम्। 'कर्षात्वतो घञोऽन्त उदात्तः' इति पूर्वसूत्रात् उदात्तः इति प्रथमान्तं पदम् अनुवर्तते। आदिः इति प्रथमान्तं पदं च पूर्वसूत्रात् अनुवर्तते। तेन आमन्त्रितस्य आदिः उदात्तः इति पदयोजना भवति। आदिः इति पदम् उदात्तः इत्यस्य विशेषणं भवति। अचः एव उदात्तादिस्वराः भवन्ति। अत एव सूत्रार्थः भवति यत् आमन्त्रितस्य आदिः अच् उदात्तः भवति इति।

सम्बोधने या प्रथमा, तदन्तस्य पदस्य आमन्त्रितसंज्ञा भवति। 'सामन्त्रितम्' इति आमन्त्रितसंज्ञाविधायकं सूत्रम्। यथा देवदत्त! इति देवदत्तशब्दस्य सम्बोधनैकवचनस्य रूपम्। अतः देवदत्त इति पदम् आमन्त्रितसंज्ञं भवति।

उदाहरणम् - अग्ने इन्द्र वरुण मित्र देवाः इति।

सूत्रार्थसमन्वयः - प्रस्तुतेऽस्मिन् उदाहरणे अग्ने इन्द्र वरुण मित्र देवाः इति पञ्च सम्बोधनान्तानि पदानि वर्तन्ते। अतः एतेषां पञ्चानां पदानां 'सामन्त्रितम्' इति सूत्रेण आमन्त्रितसंज्ञा भवति। ततः अग्निशब्दस्य सम्बोधनैकवचनविवक्षायां सुप्रत्यये अनुबन्धलोपे अग्नि स् इति स्थिते 'एकवचनं सम्बुद्धिः' इति सूत्रेण सुप्रत्ययस्य सम्बुद्धिसंज्ञायां 'ह्रस्वस्य गुणः' इति सूत्रेण सम्बुद्धिपरकत्वात् ह्रस्वस्य अङ्गसंज्ञकस्य अग्निशब्दस्य अन्त्यस्य इकारस्य गुणे एकारे अग्ने स् इति स्थितिः जायते। ततः 'एङ्ह्रस्वात् सम्बुद्धेः' इति सूत्रेण एङन्तात् अग्ने इत्यस्मात् परस्य सम्बुद्धिहलः सकारस्य लोपे अग्ने इति पदं सिध्यति। ततः आमन्त्रितसंज्ञकस्य अग्ने इति पदस्य आदेः अचः अकारस्य प्रकृतसूत्रेण उदात्तस्वरः विधीयते। एवम् एव इन्द्र वरुण मित्र देवाः इत्यादौ अपि आदीनाम् अचां यथाक्रमम् इकारस्य अकारस्य इकारस्य एकारस्य च उदात्तस्वरः प्रकृतसूत्रेण भवति। अत एव अग्ने इति प्रयोगः सिध्यति।

८.५) आमन्त्रितस्य च॥ (८.१.१९)

सूत्रार्थः - पदात् परस्य अपादादिस्थितस्य आमन्त्रितस्य सर्वस्य अनुदात्तः स्यात्।

सूत्रव्याख्या - षड्विधेषु पाणिनीयसूत्रेषु इदं विधिसूत्रम्। सूत्रेऽस्मिन् पदद्वयं विद्यते। आमन्त्रितस्य इति षष्ठ्येकवचनान्तं पदम्। च इत्यव्ययपदम्। 'पदस्य', 'पदात्', 'अनुदात्तं सर्वमपादादौ' चेति सूत्रत्रयम् अधिक्रियते। तेन पदस्य इति षष्ठ्यन्तं पदम्, पदात् इति पञ्चम्यन्तं पदम्, अनुदात्तम् इति प्रथमान्तं पदम्, सर्वम् इति प्रथमान्तं पदम्, अपादादौ इति सप्तम्यन्तं पदं च अधिकारात् लभ्यते। अधिकारात् लब्धम् अनुदात्तम् इति पदं पुल्लिङ्गान्ततया विपरिणमते, तेन अनुदात्तः इति भवति। एवम् एव सर्वम् इति पदं षष्ठ्यन्ततया विपरिणमते, तेन सर्वस्य इति भवति। आमन्त्रितस्य इति पदं पदस्य इत्यनेन सह सम्बद्धते। पदात् अपादादौ सर्वस्य आमन्त्रितस्य पदस्य अनुदात्तः इति पदयोजना भवति।

पदात् इत्यत्र पञ्चमीनिर्दिष्टत्वात् 'तस्मादित्युत्तरस्य' इति परिभाषया परस्य इति पदं लभ्यते। अपादादौ इत्यत्र औपश्लोषिकसप्तमी वर्तते, अतः अपादादौ स्थितस्य इत्यर्थः लभ्यते। पदात् परं किञ्च पादस्य आदौ अवर्तमानं यत् आमन्त्रितं पदं, तस्य सर्वस्य पदस्य अनुदात्तस्वरः भवति इति सूत्रार्थः लभ्यते।

उदाहरणम् - इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमम् इति उदाहरणम्।

सूत्रार्थसमन्वयः - प्रस्तुतेऽस्मिन् उदाहरणे गङ्गे इति यमुने इति सरस्वति इति च पदत्रयं सम्बोधनान्तं वर्तते। अतः एतेषां त्रयाणां पदानां 'सामन्त्रितम्' इति सूत्रेण आमन्त्रितसंज्ञा भवति। मे इत्यस्मात् पदात् परं गङ्गे इति पदम् अस्ति, किञ्च तत् गङ्गे इति पदं पादस्य आदौ न विद्यते, अतः आमन्त्रितसंज्ञकस्य सम्पूर्णस्य गङ्गे इति पदस्य प्रकृतसूत्रेण अनुदात्तस्वरः विधीयते। एवम् एव गङ्गे

इत्यस्मात् पदात् परं यमुने इति पदम् अस्ति, किञ्च तत् यमुने इति पदं पादस्य आदौ न वर्तते, अतः आमन्त्रितसंज्ञकस्य सम्पूर्णस्य यमुने इति पदस्य प्रकृतसूत्रेण अनुदात्तस्वरः विधीयते। समानम् एव आमन्त्रितसंज्ञकस्य सरस्वति इति सम्पूर्णस्य पदस्य अपि प्रकृतसूत्रेण अनुदात्तस्वरः भवति। तेन इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमम् इत्येवं प्रयोगः सम्भवति।

विशेषः -

अपादादौ इति पदाभावात् सूत्रस्य अर्थः भवति यत् पदात् परं विद्यमानस्य सम्पूर्णस्य आमन्त्रितस्य पदस्य अनुदात्तस्वरः भवति इति। तदा प्रस्तुते एव उदाहरणे शुतुद्रि इति पदस्य सम्बोधनान्तत्वेन 'सामन्त्रितम्' इत्यनेन आमन्त्रितसंज्ञा भवति, ततः सरस्वति इत्यस्मात् पदात् परस्य आमन्त्रितसंज्ञकस्य शुतुद्रि इत्यस्य सम्पूर्णस्य पदस्य प्रकृतसूत्रेण अनुदात्तस्वरः प्राप्नोति, अतः तद्वारणाय अपादादौ इति उक्तम्। अतः शुतुद्रि इति पदस्य पादादौ स्थितत्वात् प्रकृतसूत्रेण अनुदात्तस्वरः न भवति।

८.६) विभाषितं विशेषवचने॥ (८.१.७४)

सूत्रार्थः - आमन्त्रितान्ते विशेषणे परे पूर्वं बहुवचनान्तम् अविद्यमानवद् वा भवति।

सूत्रव्याख्या - अतिदेशसूत्रमिदम्। अनेन सूत्रेण अविद्यमानवत्त्वम् अतिदिश्यते। अस्मिन् सूत्रे पदद्वयं विराजते। विभाषितम् इति प्रथमान्तं पदम्। विशेषवचने इति सप्तम्येकवचनान्तं समस्तं पदम्। अत्र भाष्यकारः बहुवचनम् इति पदं योजयित्वा सूत्रमिदं पूरितवान्। 'आमन्त्रितं पूर्वमविद्यमानवत्' इति सम्पूर्णमपि सूत्रम् अत्र अनुवर्तते। 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति सूत्रात् समानाधिकरणे आमन्त्रिते इति सप्तम्येकवचनान्तं पदद्वयम् अनुवर्तते। सम्बोधने या प्रथमा, तदन्तं पदं वेदे आमन्त्रितम् इत्युच्यते। अतः आमन्त्रितम् इत्यनेन पदस्य आक्षेपः क्रियते। आमन्त्रिते समानाधिकरणे विशेषवचने पदे आमन्त्रितं बहुवचनं पदं विभाषितम् अविद्यमानवत् इति पदयोजना। विशेषवचनम् इत्यस्य विशेषणम् इत्यर्थः। समानाधिकरणम् इत्यस्य समानविभक्तिकम् इत्यर्थः। आमन्त्रितं बहुवचनम् इति उभयमपि पदस्य विशेषणम्। अतः तदन्तविधिः भवति। तेन सूत्रस्य अर्थः आयाति - आमन्त्रितान्ते समानाधिकरणे विशेषणे पदे परे आमन्त्रितान्तं बहुवचनान्तं पदं विकल्पेन अविद्यमानवत् भवति इति। अस्य सामान्यः अर्थः हि यदि आमन्त्रितान्तं समानाधिकरणं विशेषणपदं परं तिष्ठति तर्हि आमन्त्रितान्तं बहुवचनान्तं पदं विकल्पेन अविद्यमानवत् भवति।

इदं सूत्रं 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति पूर्वसूत्रस्य अपवादभूतं वर्तते। आमन्त्रितान्ते समानाधिकरणे पदे परे पूर्वम् आमन्त्रितान्तं सामान्यवचनं पदम् अविद्यमानवद् न भवति इति तस्य सूत्रस्य अर्थः। एवं तेन सूत्रेण अविद्यमानवत्त्वं निषिध्यते। अनेन सूत्रेण तु आमन्त्रितान्ते समानाधिकरणे विशेषणे पदे परे आमन्त्रितान्तस्य बहुवचनान्तस्य पदस्य विकल्पेन अविद्यमानवत्त्वं विधीयते।

उदाहरणम्-देवीः षळुर्वीरुरु नः कृणोत।

सूत्रार्थसमन्वयः- अस्मिन् उदाहरणे देवीः इति पदं सम्बोधनविभक्त्यन्तं वर्तते। अतः तस्य आमन्त्रितत्वं सिध्यति। व्यपदेशिवद्भावम् आश्रित्य देवीः इति पदस्य आमन्त्रितान्तत्वम् अपि सिध्यति। इदं च पदं बहुवचनान्तम् अपि वर्तते। ततः विद्यमानं षट् इति पदम् अपि सम्बोधनविभक्त्यन्तत्वात् आमन्त्रितं वर्तते। व्यपदेशिवद्भावम् आश्रित्य षट् इति पदस्य अपि आमन्त्रितान्तत्वं सिध्यति। इदं च पदं पूर्ववर्तिना देवीः इति पदेन सह समानविभक्तिकं तस्य विशेषणं च वर्तते। अतः तस्मिन् आमन्त्रितान्ते समानाधिकरणे विशेषणे षट्-शब्दे परे पूर्वस्य आमन्त्रितान्तस्य बहुवचनान्तस्य देवीः इति पदस्य अविद्यमानवत्त्वं प्रकृतसूत्रेण विधीयते। इदं च अविद्यमानवत्त्वं वैकल्पिकं वर्तते। तेन अविद्यमानवत्त्वपक्षे देवीः इति पदम् अविद्यमानं भवति। तदा षट्-शब्दः एव पादादौ तिष्ठति। तेन अष्टमाध्यायस्थम् 'आमन्त्रितस्य च' इति सूत्रं तत्र न प्रवर्तते। षष्ठाध्यायस्थेन 'आमन्त्रितस्य च' इति सूत्रेण तत्र उदात्तस्वरः विधीयते। अविद्यमानवत्त्वस्य अभावपक्षे देवीः इति पदं विद्यमानमेव भवति। तदा षट् इति पदं पादादौ न तिष्ठति। अतः आष्टमिकेन 'आमन्त्रितस्य च' इति सूत्रेण सर्वानुदात्तस्वरः विधीयते।

८.७) सुबामन्त्रिते पराङ्गवत्स्वरे॥ (२.१.२)

सूत्रार्थः - सुबन्तम् आमन्त्रिते परे परस्य अङ्गवद् भवति स्वरे कर्तव्ये।

सूत्रव्याख्या- षड्विधेषु पाणिनीयसूत्रेषु अतिदेशसूत्रमिदम्। अनेन सूत्रेण अङ्गवत्त्वम् अतिदिश्यते। सुप् आमन्त्रिते पराङ्गवत् स्वरे इति सूत्रगतपदच्छेदः। अस्मिन् सूत्रे चत्वारि पदानि वर्तन्ते। तत्र सुप् इति प्रथमान्तं पदम्। आमन्त्रिते इति सप्तम्येकवचनान्तं पदम्। पराङ्गवत् इति प्रथमान्तं समस्तं पदम्। स्वरे इति सप्तम्येकवचनान्तं पदम्। सम्बोधन या प्रथमा, तदन्तं पदं वेदे आमन्त्रितम् इत्युच्यते। अतः आक्षेपेण पदम् इति लभ्यते। सुप् आमन्त्रिते पदे पराङ्गवत् स्वरे इति पदयोजना। 'प्रत्ययग्रहणे तदन्ता ग्राह्याः' इति परिभाषाबलेन सुप् इत्यनेन सुबन्तम् इति ग्राह्यम्। आमन्त्रितम् इति पदस्य विशेषणम्। अतः अत्र तदन्तविधिः भवति। परस्य अङ्गवत् पराङ्गवत् इति षष्ठीतत्पुरुषसमासः। अत्र अङ्गशब्दः अवयववाचकः वर्तते। कर्तव्ये इति अध्याह्रियते। तेन सुबन्तम् आमन्त्रितान्ते पदे परे परस्य अङ्गवत् भवति स्वरे कर्तव्ये इति सूत्रार्थः आयाति। अस्य सामान्यः अर्थो हि यदि सुबन्तात् परम् आमन्त्रितान्तं पदं तिष्ठति तर्हि तत् सुबन्तपदं परवर्तिनः आमन्त्रितान्तपदस्य अवयववत् भवति। अर्थात् आमन्त्रिते पदे यादृशः स्वरः अस्ति तादृशः एव स्वरः पूर्ववर्तिनि सुबन्ते अपि प्रयोज्यः।

इदमत्र अवधेयम् - यदि सुबन्तम् आमन्त्रितान्तम् इति पदद्वयं पादादौ तिष्ठति तर्हि तत्र 'आमन्त्रितस्य च' इत्यनेन षष्ठाध्यायस्थेन सूत्रेण आद्युदात्तः भवति। यदि सुबन्तम् आमन्त्रितान्तम् इति पदद्वयं पादादौ न तिष्ठति तर्हि 'आमन्त्रितस्य च' इत्यनेन अष्टमाध्यायस्थेन सूत्रेण सर्वानुदात्तस्वरः विधीयते। किन्तु स्वरविधाने कर्तव्ये एव इदं पराङ्गवत्त्वं सिध्यति, न ततः अन्येषु स्थलेषु।

उदाहरणम्- द्रवत्पाणी शुभस्पती। यत्तं दिवो दुहितर्मर्त भोजनम्।

सूत्रार्थसमन्वयः- शुभस्पती इति अत्र उदाहरणं वर्तते। शुभ शुम्भ दीप्तौ इति धातोः भावे क्विप्प्रत्यये शुब् इति शब्दः निष्पद्यते। तस्य षष्ठीविभक्तौ शुभः इति रूपं सिध्यति। पती इति पदं सम्बोधने वर्तते। तस्मिन् परे शुभः इति पदस्य विसर्गस्य स्थाने 'षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु'

इति सूत्रेण सकारः भवति। अत्र शुभस् इति षष्ठ्येकवचनान्तं सुबन्तं पदम्। ततः पती इति आमन्त्रितं पदं वर्तते। व्यपदेशिवद्भावम् आश्रित्य अस्य आमन्त्रितान्तत्वम् अपि सिध्यति। अतः प्रकृतसूत्रेण शुभस् इति पदम् आमन्त्रितान्तस्य पती इति पदस्य अवयववत् भवति। तेन 'आमन्त्रितस्य च' इति षाष्ठेन सूत्रेण शुभस्पती इत्यस्य समुदायस्य आदिस्वरः उदात्तः विधीयते। आष्टमिकेन सूत्रेण अत्र सर्वानुदात्तस्वरः भवितुं नार्हति। यतो हि 'आमन्त्रितं पूर्वमविद्यमानवत्' इति सूत्रेण द्रव्यत्पाणी इति पदम् अविद्यमानवत् अस्ति। तेन शुभस्पती इति पदं पादादौ एव अस्ति। पादादौ विद्यमानस्य आमन्त्रितपदस्य षाष्ठेन 'आमन्त्रितस्य च' इति सूत्रेण सर्वानुदात्तस्वरः भवितुं नार्हति। यतो हि 'आमन्त्रितस्य च' इत्यनेन सूत्रेण अपादादौ विद्यमानस्य आमन्त्रितस्य सर्वानुदात्तस्वरः विधीयते।

यत्तें दिवो दुहितर्मर्तु भोजनम् इत्यस्मिन् ऋङ्मन्त्रे दुहितः इति पदं सम्बोधने वर्तते। अतः इदं आमन्त्रितं वर्तते। व्यपदेशिवद्भावम् आश्रित्य अस्य आमन्त्रितान्तत्वम् अपि सिध्यति। तस्मिन् आमन्त्रितान्ते पदे परे पूर्वं विद्यमानं दिवः इति सुबन्तं पदं परस्य अवयववत् भवति। तेन दिवः इति पदम् अपि आमन्त्रितं भवति। तच्च अत्र पदात् परं विद्यते, पादादौ न विद्यते। अतः आष्टमिकेन 'आमन्त्रितस्य च' इति सूत्रेण अत्र सर्वानुदात्तः विधीयते।

पाठगतप्रश्नाः - २

९. षष्ठाध्यायस्थस्य 'आमन्त्रितस्य च' इति सूत्रस्य कः अर्थः ?
१०. अष्टमाध्यायस्थे 'आमन्त्रितस्य च' इत्यस्मिन् सूत्रे के अधिकाराः आयान्ति ?
११. अष्टमाध्यायस्थस्य 'आमन्त्रितस्य च' इति सूत्रस्य उदाहरणम् एकं लिखत।
१२. 'विभाषितं विशेषवचने' इति कीदृशं सूत्रम् ?
१३. 'विभाषितं विशेषवचने' इति सूत्रे बहुवचनम् इति पदं कथम् आगच्छति ?
१४. 'विभाषितं विशेषवचने' इति कस्य अपवादसूत्रम् ?
१५. किं नाम आमन्त्रितम् ?
१६. 'सुबामन्त्रिते पराङ्गवत्स्वरे' इति सूत्रस्य कः अर्थः ?
१७. कस्मिन् कर्तव्ये 'सुबामन्त्रिते पराङ्गवत्स्वरे' इति सूत्रं प्रवर्तते ?
१८. शुभस्पती इत्युदाहरणे शुभः इत्यत्र का विभक्तिः ?
१९. आष्टमिकेन 'आमन्त्रितस्य च' इति सूत्रेण किं विधीयते -
    (क) अनुदात्तः (ख) अन्तोदात्तः (ग) सर्वानुदात्तः (घ)आद्युदात्तः
२०. षाष्ठेन 'आमन्त्रितस्य च' इति सूत्रेण किं विधीयते -
    (क) अनुदात्तः (ख) अन्तोदात्तः (ग) सर्वानुदात्तः (घ)आद्युदात्तः

८.८) उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य॥ (८.२.४)

सूत्रार्थः-उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्य अनुदात्तस्य स्वरितः भवति।

सूत्रव्याख्या- पाणिनीयेषु षड्विधेषु सूत्रेषु विधिसूत्रमिदम्। अनेन सूत्रेण स्वरितस्वरः विधीयते। उदात्तस्वरितयोः यणः स्वरितः अनुदात्तस्य इति सूत्रगतपदच्छेदः। अस्मिन् सूत्रे चत्वारि पदानि वर्तन्ते। तत्र उदात्तस्वरितयोः इति सप्तमीद्विवचनान्तं पदम्। यणः इति पञ्चम्येकवचनान्तं पदम्। स्वरितः इति प्रथमान्तं विधेयपदम्। अनुदात्तस्य इति षष्ठ्येकवचनान्तं पदम्। उदात्तस्वरितयोः यणः अनुदात्तस्य स्वरितः पदयोजना। उदात्तस्वरितयोः इत्यस्य उदात्तस्थाने स्वरितस्थाने इत्यर्थः। तेन उदात्तस्थाने स्वरितस्थाने च यः यण् वर्तते ततः परस्य अनुदात्तस्य स्वरितः भवति इति सूत्रार्थः आयाति। अस्य सामान्यः अर्थो हि उदात्तस्थाने यः यण् विहितः तस्मात् यणः परं वर्तमानस्य अनुदात्तस्य स्वरितः भवति। स्वरितस्थाने च यः यण् विहितः तस्मात् यणः परं वर्तमानस्य अनुदात्तस्य स्वरितः भवति।

उदाहरणम्- अभ्य॑भि हि। खलप्व्या॑शा।

सूत्रार्थसमन्वयः- अभ्य॑भि इति उदात्तस्थाने विहितस्य यणः उदाहरणम्। अभि अभि इति स्थिते 'इको यणचि' इति सूत्रेण अचि परे अभि इत्यस्य इकारस्य स्थाने यणादेशे अभ्यभि इति रूपं सिध्यति। अभिशब्दे प्राप्तस्य उदात्तस्य 'उपसर्गश्चाधिवर्जम्' इति सूत्रेण निषेधः भवति। अतः 'फिषोन्त उदात्तः' इति सूत्रेण अभिशब्दे अन्तोदात्तः विधीयते। अतः अभिशब्दस्य अन्त्यः इकारः उदात्तः अस्ति। अभिशब्दस्य 'नित्यवीप्सयोः' इति सूत्रेण द्वित्वे अभि अभि इति लभ्यते। ततः द्वयोः अभिशब्दयोः परस्य अभिशब्दस्य 'अनुदात्तं च' इति सूत्रेण अनुदात्तस्वरः विधीयते। अस्याम् अवस्थायां प्रथमस्य अभि इत्यस्य उदात्तस्य इकारस्य स्थाने यण् विहितः। अतः तस्मात् परस्य अनुदात्तस्य स्थाने प्रकृतसूत्रेण स्वरितस्वरः विधीयते।

खलप्व्या॑शा इति स्वरितस्थाने विहितस्य यणः उदाहरणम्। खलपूशब्दस्य सप्तम्येकवचने खलप्वि इति रूपम्। खलप्वि आशा इति स्थिते 'इको यणचि' इति सूत्रेण अचि परे खलप्वि इत्यस्य इकारस्य स्थाने यणादेशे खलप्व्याशा इति रूपं सिध्यति। यदि उपपदसमासस्य उत्तरपदे किमपि कृदन्तं पदं तिष्ठति तर्हि तत् कृदन्तपदं प्रकृत्या एव उदात्तः भवति। अत्र खलपूशब्दः उपपदसमासेन निष्पन्नः। अस्य उत्तरपदं च कृदन्तं वर्तते। अतः खलपूशब्दः अन्तोदात्तः इति सिध्यति। तस्मात् खलपूशब्दात् ङिप्रत्यये प्रक्रियाकार्ये खलपू इ इति जाते 'इको यणचि' इति सूत्रेण यणि खलप्वि इति रूपं सिध्यति। अत्र यः यण् वर्तते स उदात्तस्य स्थाने विहितः। ङिप्रत्ययस्य इकारश्च सुप्त्वाद् अनुदात्तः। अतः उदात्तस्थाने यः यण् ततः परस्य अनुदात्तस्य इकारस्य प्रकृतसूत्रेण स्वरितस्वरः विधीयते। आशाशब्दः 'आशाया अदिगख्या चेत्' इति सूत्रेण अन्तोदात्तः वर्तते। अतः 'अनुदात्तं पदमेकवर्जम्' इति सूत्रेण तस्य आदिमः आकारः अनुदात्तः इति सिध्यति। खलप्वि आशा इति स्वरितस्य इकारस्य स्थाने यण् विहितः। एवं स्वरितस्थाने विहितः यः यण् ततः परस्य अनुदात्तस्य आकारस्य प्रकृतस्थाने स्वरितस्वरः विहितः।

८.९) एकादेश उदात्तेनोदात्तः॥ (८.२.५)

सूत्रार्थः- उदात्तेन सह एकादेशः उदात्तः भवति।

सूत्रव्याख्या- पाणिनीयेषु षड्विधेषु सूत्रेषु विधायकमिदम्। इदं सूत्रम् उदात्तस्वरं विदधाति। एकादेशः उदात्तेन उदात्तः इति सूत्रगतपदच्छेदः। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। एकादेशः इति प्रथमैकवचनान्तं पदम्। उदात्तेन इति तृतीयैकवचनान्तं पदम्। उदात्तः इति प्रथमैकवचनान्तं विधेयपदम्। उदात्तेन एकादेश उदात्तः इति सूत्रगतपदयोजना। सूत्रेऽस्मिन् सहशब्दस्य उल्लेखः नास्ति। किन्तु यथा 'वृद्धो यूना तल्लक्षणश्चेदेव विशेषः' इति सूत्रे यूना इत्यत्र सहशब्दं विनापि तृतीया भवति तद्वत् अत्रापि उदात्तेन इत्यत्र सहयोगात् तृतीया अस्ति। तेन सूत्रस्य अर्थः भवति - उदात्तेन सह एकादेशः उदात्तः भवति।

उदात्तेन सह एकादेशः त्रिविधः भवितुम् अर्हति - उदात्तानुदात्तयोः स्थाने एकादेशः, उदात्तोदात्तयोः स्थाने एकादेशः, उदात्तस्वरितयोः स्थाने एकादेशः च। उदात्तोदात्तयोः स्थाने एकादेशः भवति चेत् आन्तरतम्यादेव उदात्तस्य प्राप्तिः भवति। अतः तस्य कृते सूत्रमिदं नावश्यकम्। किन्तु यदा उदात्तानुदात्तयोः उदात्तस्वरितयोः वा स्थाने एकादेशः भवति तदा अनुदात्तस्य स्वरितस्य च प्राप्तिः भवति। अतः तत्रापि उदात्तविधानाय अस्य सूत्रस्य प्रवर्तनम्।

उदाहरणम्- क्व॑ वोऽश्वाः। क्वाव॑रं मरुतः।

सूत्रार्थसमन्वयः- क्व॑ वोऽश्वाः इत्यत्र उदात्तानुदात्तयोः स्थाने एकादेशः भवति। तथाहि वस् अश्वाः इति स्थिते 'ससजुषो रुः' इति पदान्तस्य सकारस्य रुत्वे अनुबन्धलोपे वर् अश्वाः इति जाते 'अतो रोरप्लुतादप्लुते' इति सूत्रेण अप्लुताद् अकारात् परस्य रोः अप्लुताकरपरकत्वात् उत्वे व उ अश्वाः इति जाते आद् गुणः इति सूत्रेण पूर्वपरयोः उकाराकारयोः स्थाने ओकाररूपे गुणैकादेशे वो अश्वाः इति जाते 'एकः पूर्वपरयोः' इत्यधिकारे पठितेन 'एङः पदान्तादति' इति सूत्रेण पूर्वपरयोः ओकाराकारयोः स्थाने ओकाररूपपूर्वरूपैकादेशः भवति। वस्तुतः बहुवचने युष्मद्-शब्दस्य स्थाने 'बहुवचनस्य वस्नसौ' इति सूत्रेण वस् इत्यादेशः भवति। 'बहुवचनस्य वस्नसौ' इत्यस्मिन् सूत्रे 'अनुदात्तं सर्वमपादादौ' इति सूत्रम् अनुवर्तते। अतः वस् इत्यादेशः अनुदात्तः अस्ति। अश्-धातोः क्विन्प्रत्यये निष्पन्नः अश्वशब्दः आद्युदात्तः। एवम् अश्वशब्दस्य आदिमः अकारः उदात्तः। एतयोः उदात्तानुदात्तयोः स्थाने अत्र एकादेशः जातः। अतः अनयोः स्थाने जायमानः ओकाररूपपूर्वरूपैकादेशः प्रकृतसूत्रेण उदात्तः भवति।

क्वाव॑रं मरुतः इत्यत्र उदात्तस्वरितयोः स्थाने एकादेशः भवति। क्व अवरम् इति स्थिते 'एकः पूर्वपरयोः' इत्यधिकारे पठितेन 'अकः सवर्णे दीर्घः' इति सूत्रेण पूर्वपरयोः अकाराकारयोः स्थाने आकाररूपसवर्णदीर्घैकादेशः भवति। किम्-शब्दात् 'किमोऽत्' इति सूत्रेण अदादेशः भवति। तदन्तरम् अतः तकारस्य अनुबन्धलोपे किम् अ इति स्थिते अति परे 'क्वाति' इति सूत्रेण किमः स्थाने क्वादेशे क्व अ इति जाते 'यति भम्' इति सूत्रेण क्व इत्यस्य भसंज्ञायां 'यस्येति च' भसंज्ञकस्य अकारस्य लोपे क्व् अ इति जाते सर्वसंयोगे निष्पन्नस्य क्व इत्यस्य प्रातिपदिकत्वात् सुबुत्पत्तौ अव्ययत्वात् 'अव्ययादाप्सुपः' इति सुपो लुकि क्व इति रूपं सिध्यति। अत् इत्यत्र तकारः 'हलन्त्यम्' इति सूत्रेण इत्संज्ञकः। अतः

'तित्स्वरितम्' इति सूत्रेण क्व इत्यत्र स्वरितस्वरः विधीयते। अवरशब्दः 'स्वाङ्गशिटामदन्तानाम्' इति सूत्रेण आद्युदात्तः वर्तते। अर्थात् अवरशब्दस्य आदिमः अकारः उदात्तः। एतयोः उदात्तस्वरितयोः स्थाने अत्र एकादेशः जातः। अतः अनयोः स्थाने जायमानः आकाररूपसवर्णदीर्घैकादेशः प्रकृतसूत्रेण उदात्तः भवति।

८.१०) स्वरितो वानुदात्ते पदादौ॥ (८.२.६)

सूत्रार्थः- अनुदात्ते पदादौ परे उदात्तेन सह एकादेशः स्वरितो वा भवति।

सूत्रव्याख्या- विधिसूत्रमिदम्। अनेन सूत्रेण विकल्पेन स्वरितस्वरः विधीयते। स्वरितः वा अनुदात्ते पदादौ इति सूत्रगतपदच्छेदः। अस्मिन् सूत्रे चत्वारि पदानि वर्तन्ते। स्वरितः इति प्रथमान्तं विधेयपदम्। वा इति अव्ययपदम्। अनुदात्ते पदादौ इति उभयमपि पदं सप्तम्येकवचनान्तम्। 'एकादेश उदात्तेनोदात्तः' इति सूत्रात् एकादेशः इति प्रथमैकवचनान्तम् उदात्तेन इति च तृतीयैकवचनान्तं पदम् अनुवर्तते। अनुदात्ते पदादौ उदात्तेन एकादेश स्वरितो वा इति पदयोजना। उदात्तेन इत्यत्र सहयोगात् तृतीया अस्ति। तेन सूत्रार्थः आयाति अनुदात्ते पदादौ परे उदात्तेन सह एकादेशः विकल्पेन स्वरितो भवति इति। अस्य सामान्यः अर्थः हि यदि पदादौ अनुदात्तस्वरः तिष्ठति, ततःपूर्वं च उदात्तस्वरः तिष्ठति तर्हि तस्य अनुदात्तस्य उदात्तस्य च स्थाने यः एकादेशः भवति स एकादेशः विकल्पेन स्वरितः भवति। यस्मिन् पक्षे स्वरितः न भवति तत्र एकादेश उदात्तेनोदात्तः इति पूर्वसूत्रेण उदात्तस्वरः भवति।

अस्मिन् सूत्रे या विभाषा वर्तते सा व्यवस्थितविभाषा वर्तते। अस्याः विभाषायाः प्रवृत्तेः तथा कोपि निर्दिष्टः नियमः नास्ति। इयं विभाषा कुत्रापि प्रवर्तते, कुत्रापि न प्रवर्तते। अतः अनेन सूत्रेण कुत्रापि स्वरितस्वरः भवति, कुत्रापि उदात्तस्वरः भवति।

उदाहरणम्- वींदं ज्योतिर्हृदंये। अस्य श्लोकौं दिंवीयते।

सूत्रार्थसमन्वयः- वींदम् इति स्वरितस्य उदाहरणम्। वि इदम् इति स्थिते 'एकः पूर्वपरयोः' इत्यधिकारे पठितेन 'अकः सवर्णे दीर्घः' इति सूत्रेण पूर्वपरयोः इकारेकारयोः स्थाने ईकाररूपसवर्णदीर्घैकादेशे वीदम् इति रूपं सिध्यति। वि इति एकः निपातः वर्तते। अतः निपातकारणात् अयम् आद्युदात्तः। इदम्-शब्दः 'फिषोन्त उदात्तः' इति फिट्सूत्रेण अन्तोदात्तः वर्तते। अतः 'अनुदात्तं पदमेकवर्जम्' इति सूत्रेण अस्य आदिमः इकारः अनुदात्तः वर्तते। एवं वि इत्यत्र उदात्तस्वरः वर्तते। ततः इदम् इत्यत्र पादादौ अनुदात्तस्वरः वर्तते। अतः अनयोः उदात्तानुदात्तयोः स्थाने यः ईकाररूपः एकादेशः जातः स प्रकृतसूत्रेण विकल्पेन स्वरितः भवति।

दिंवीयते इति उदात्तस्य उदाहरणम्। दिवि ईयते इति स्थिते 'एकः पूर्वपरयोः' इत्यधिकारे पठितेन 'अकः सवर्णे दीर्घः' इति सूत्रेण पूर्वपरयोः इकारेकारयोः स्थाने ईकाररूपसवर्णदीर्घैकादेशे दिवीयते इति रूपं सिध्यति। दिवि इत्यत्र या ङिविभक्तिः वर्तते सा 'उडिदम्पदाद्यप्पुम्रैद्युभ्यः' इति सूत्रेण उदात्ता वर्तते। दिवादिगणीयस्य ईङ् गतौ इति धातोः लटि प्रथमपुरुषैकवचने ईयते इति रूपं सिध्यति। दिवि इति अतिङन्तं पदं वर्तते। ईयते इति च तिङन्तं पदं वर्तते। अतः 'तिङ्ङतिङः' इति सूत्रेण ईयते

इत्यस्य ईकारः अनुदात्तः वर्तते। अतः अनयोः उदात्तानुदात्तयोः स्थाने यः ईकाररूपः एकादेशः जातः तत्र प्रकृतसूत्रेण स्वरितस्वरः प्राप्तः आसीत्। किन्तु सूत्रस्य वैकल्पिकत्वात् पक्षे 'एकादेश उदात्तेनोदात्तः' इति सूत्रेण उदात्तस्वरः विहितः।

पाठगतप्रश्नाः - ३

२१. 'उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य' इत्यनेन सूत्रेण किं विधीयते ?

२२. आशाशब्दः केन सूत्रेण अन्तोदात्तः वर्तते ?

२३. अभिशब्दस्य द्वित्वं केन सूत्रेण भवति ?

२४. खलपू-शब्दे कः समासः वर्तते -

(क) अव्ययीभावसमासः (ख) उपपदसमासः (ग) तत्पुरुषसमासः (घ) कर्मधारयसमासः

२५. किमः स्थाने क्वादेशः केन सूत्रेण भवति ?

२६. अवरशब्दः केन सूत्रेण आद्युदात्तः वर्तते ?

२७. 'एकादेश उदात्तेनोदात्तः' इत्यस्मिन् सूत्रे उदात्तेन इत्यत्र कथं तृतीया ?

२८. क्वं वोऽश्वाः इत्यत्र कयोः स्थाने एकादेशः -

(क) उदात्तादात्तयोः (ख) उदात्तानुदात्तयोः (ग) उदात्तस्वरितयोः (घ) स्वरितोदात्तयोः

२९. क्वावरं मरुतः इत्यत्र कयोः स्थाने एकादेशः -

(क) उदात्तादात्तयोः (ख) उदात्तानुदात्तयोः (ग) उदात्तस्वरितयोः (घ) स्वरितोदात्तयोः

३०. 'स्वरितो वानुदात्ते पदादौ' इत्यस्मिन् सूत्रे कीदृशी विभाषा वर्तते ?

३१. इदम्-शब्दः केन सूत्रेण अन्तोदात्तः वर्तते ?

३२. ईयते इति कस्य धातोः रूपम् ?

३३. वीदम् इत्यत्र यः ईकारः वर्तते तत्र कः स्वरः वर्तते ?

पाठसारः

'अनुदात्तं पदमेकवर्जम्' इति परिभाषा स्वरविधिविषया वर्तते। तस्याः अर्थो हि एकस्मिन् पदे यदि एकः उदात्तः अनुदात्तः वा अच् तिष्ठति, तर्हि तम् एकम् अचं वर्जयित्वा अन्ये सर्वे अचः अनुदात्ताः भवन्ति इति। अनुदात्ते परे सति कश्चित् उदात्तस्वरः लुप्यते चेत्, तस्य लोपनिमित्तीभूतस्य अनुदात्तस्य उदात्तः भवति इति 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रस्य सामान्यः अर्थः। अकारः लुप्तः जातः एवं यः अञ्चधातुः तस्मिन् अञ्चधातौ परे सति पूर्वस्य अन्तोदात्तः भवति इति 'चौ' इति सूत्रार्थः। सम्बोधने या प्रथमा तदन्तं पदं वेदे आमन्त्रितम् इति कथ्यते। आमन्त्रितसंज्ञकस्य पदस्य आदिः अच् उदात्तः भवति इति षष्ठाध्याये पठितस्य 'आमन्त्रितस्य च' इति सूत्रस्य अर्थः। अष्टमाध्याये पठितस्य 'आमन्त्रितस्य च' इति सूत्रस्य अर्थो हि पदात् परं किञ्च पादस्य आदौ अवर्तमानं यत् आमन्त्रितं पदं, तस्य सर्वस्य पदस्य अनुदात्तस्वरः भवति इति। 'विभाषितं विशेषवचने' इति एकम् अतिदेशसूत्रं वर्तते। यदि आमन्त्रितान्तं समानविभक्तिकं विशेषणपदं परं तिष्ठति तर्हि आमन्त्रितान्तं बहुवचनान्तं पदं विकल्पेन अविद्यमानवत् भवति इति तस्य सूत्रस्य अर्थः। अविद्यमानवत्त्वे सञ्जाते तद् आश्रित्य बहूनि विधानानि सम्भवन्ति। ततः 'सुबामन्त्रिते पराङ्गवत्स्वरे' इति सूत्रेण आमन्त्रिते पदे परे पूर्ववर्तिनः सुबन्तस्य पदस्य अङ्गवत्त्वम् अतिदिष्टम्। उदात्तस्थाने स्वरितस्थाने च यो यण् वर्तते ततः परस्य अनुदात्तस्य स्वरितः भवति इति 'उदात्तस्वरितयोर्यणः स्वरितोनुदात्तस्य' इति सूत्रस्य अर्थः। 'एकादेश उदात्तेनोदात्तः' इति सूत्रेण उदात्तानुदात्तयोः उदात्तस्वरितयोः च स्थाने यः एकादेशः भवति स एकादेशः उदात्तः भवति इति। ततः परवर्तिना 'स्वरितो वानुदात्ते पदादौ' इति सूत्रेण विकल्पेन स्वरितस्वरः विहितः। तस्य च सूत्रस्य अनुदात्ते पदादौ परे उदात्तेन सह एकादेशः विकल्पेन स्वरितः भवति। स्वरिताभावे च 'एकादेश उदात्तेनोदात्तः' इति सूत्रेण उदात्तः भवति। एतेषां समेषामपि सूत्राणामत्र उदाहरणपुरःसरं व्याख्यानं विहितम्।

पाठान्तप्रश्नाः

१. 'अनुदात्तं पदमेकवर्जम्' इति सूत्रं व्याख्यात।
२. 'अनुदात्तस्य च यत्रोदात्तलोपः' इति सूत्रस्य उदाहरणे समन्वयं कुरुत।
३. अष्टमाध्याये विद्यमानम् 'आमन्त्रितस्य च' इति सूत्रं व्याख्यात।
४. 'विभाषितं विशेषवचने' इत्यस्य सूत्रस्य व्याख्यां कुरुत।
५. 'सुबामन्त्रिते पराङ्गवत्स्वरे' इत्यस्य सूत्रस्य व्याख्यां कुरुत।
६. क्वे वोऽश्वाः इति रूपं साधयत।
७. खलप्व्यांशा इति रूपं साधयत।
८. व्यवस्थितविभाषाविषये टिप्पणीं लिखित्वा तस्य एकम् उदाहरणं प्रदर्शयत।

पाठगतप्रश्नानामुत्तराणि -

उत्तराणि - १

१. परिभाषासूत्रम्।

२. अनुदात्ताः अस्य सन्ति इत्यर्थे अनुदात्तशब्दात् 'अर्श-आदिभ्योऽच्' इति सूत्रेण मत्वर्थीय-अच्प्रत्ययः।

३. अनुदात्तस्वरः।

४. यस्मिन् अनुदात्ते परे उदात्तः लुप्यते तस्य उदात्तः भवति।

५. दे॒वीं वाच॑म् इति।

६. उदात्तनिवृत्तिस्वरापवादभूतम् इदं सूत्रम्।

७. लुप्त-अकारविशिष्टः अञ्च्-धातुः इत्यर्थः।

८. दे॒व॒द्रीचीं॑ नयत दे॒व॒यन्तः॑ इति।

उत्तराणि-२

९. आमन्त्रितस्य आदिः उदात्तः भवति।

१०. 'पदस्य', 'पदात्', 'अनुदात्तं सर्वमापादादौ' चेति।

११. इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ शुतु॑द्रि॒ स्तोम॑म् इति।

१२. अतिदेशसूत्रम्

१३. भाष्यकारवचनात्

१४. नामन्त्रिते समानाधिकरणे सामान्यवचनम्

१५. सम्बोधनविभक्त्यन्तं पदं वेदे आमन्त्रितम् इत्युच्यते।

१६. सुबन्तमामन्त्रिते परे परस्याङ्गवद् भवति स्वरे कर्तव्ये।

१७. स्वरे कर्तव्ये

१८. षष्ठीविभक्तिः

१९. ग

२०. घ

उत्तराणि - ३

२१. स्वरितस्वरः

२२. आशाया अदिगख्या चेत् इति सूत्रेण

२३. नित्यवीप्सयोः इति सूत्रेण

२४. ख

२५. क्वाति इति सूत्रेण

२६. स्वाङ्गशिटामदन्तानाम् इति सूत्रेण

२७. सहयोगात्

२८. ख

२९. ग

३०. व्यवस्थितविभाषा

३१. फिषोन्त उदात्तः

३२. ईङ् गतौ

३३. स्वरितस्वरः

।।इति अष्टमः पाठः।।